स्तोत्र
ग्रं.नं. २३८

संस्कृत

# शीतलाष्टक स्तोत्र संपूर्ण

८९८/स्तो. २९८

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्री



॥श्रीगणेशायनमः॥स्कंदउवाच॥भगवन्
॥देवदेवेशशीतलायास्तवंशुभं॥वक्तुम
॥र्हस्यशेषेणविस्फोटकभयापहं॥१॥श्री
॥ईश्वरउवाच॥नमामिशीतलांदेवींरास
॥भस्थांदिगंबरां॥मार्जनीकलशोपेतां
॥शूर्पालंकृतमस्तकां॥२॥वंदेहंशीतलां
॥देवींसर्वरोगभयापहां॥यामासाद्य
॥निवर्त्तेतविस्फोटकभयंमहत्॥३॥शी
॥तलेशीतलेचेतियोब्रूयाद्दाहपीडितः
॥विस्फोटकभयोदाहःक्षिप्रंतस्यविन
॥श्यति॥४॥यस्त्वामुदकमध्येतुध्यात्वा
॥पूजयतेनरः॥विस्फोटकभयंघोरंगृ
॥हेतस्यनजायते॥५॥शीतलेज्वरद
॥ग्धस्यपूतिगंधगतस्यच॥प्रनष्टच
॥क्षुषःपुंसस्त्वामाहुर्जीवनौषधं॥६॥
॥शीतलेतनुजान्रोगान्नृणांहरसि
॥दुस्त्यजान्॥विस्फोटकविशीर्णानां
॥त्वमेकामृतवर्षिणी॥७॥गलगंड
॥ग्रहारोगायेचान्येदारुणान्नृणां॥
॥त्वदनुध्यानमात्रेणशीतलेयांतिसं
॥क्षयं॥८॥नमंत्रंनौषधंतत्रपापरोग
॥स्यविद्यते॥त्वमेकाशीतलेधात्री
॥नान्यंपश्यामिदेवतां॥९॥मृणालतंतु
॥सदृशीनाभिमंडलसंस्थितां॥यस्त्वां
॥विचिंतयेद्देवितस्यमृत्युर्नबाध्यते॥
॥१०॥शीतलेत्वंजगन्माताशीतलेत्वंज
॥गत्पिता॥शीतलेत्वंजगद्धात्रीशीत
॥लायैनमोस्तुते॥११॥श्रोतव्यंपठितव्य
॥चश्रद्धाभक्तिसमन्वितैः॥उपसर्गवि
॥नाशायपरंस्वस्त्ययनंमहत्॥१२॥शी
॥तलाष्टकमेवेदंनदेयंयस्यकस्यच॥
॥दातव्यंचसदातस्मैभक्तिश्रद्धान्वितो
॥हियः॥१३॥इतिश्रीस्कंदपुराणेकाशी
॥खंडेशीतलाष्टकस्तोत्रंसंपूर्णं॥ ॥

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com